শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥শ্রীনৃসিংহমঙ্গলম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীনৃসিংহমঙ্গলম্ ॥

ঘটিকাচল শৃঙগাগ্র ৱিমানোদর ৱাসিনে।
নিখিলামর সেৱ্যায নরসিংহায মঙ্গলম্॥ ১ ॥

উদীচীরঙ্গ নিৱসতসুমনস্তোম সুক্তিভিঃ।
নিত্যাভিৱৃদ্ধ যশসে নরসিংহায মঙ্গলম্॥ ২ ॥

সুধাৱল্লী পরিষৱঙ্গ সুরভীকৃত ৱক্ষসে।
ঘটিকাদ্রি নিৱাসায শ্ৰীনৃসিংহায মঙ্গলম্॥ ৩ ॥

সৰ্ৱারিষ্ট ৱিনাশায সৰ্ৱেষ্ট ফলদাযিনে।
ঘটিকাদ্রি নিৱাসায শ্ৰীনৃসিংহায মঙ্গলম্॥ ৪ ॥

মহাগুরু মনঃ পদ্ম মধ্য নিত্য নিৱাসিনে।
ভক্তোচিতায ভৱতাত্ মঙ্গলং শাশ্বতীঃ সমাঃ॥ ৫ ॥

শ্ৰীমত্যৈ ৱিষ্ণুচিত্তাৰ্য মনোনন্দন হেতৱে।
নন্দনন্দন সুন্দৰ্যৈ গোদাযৈ নিত্যমঙ্গলম্॥ ৬ ॥

শ্ৰীমন্মহাভূতপুরে শ্ৰীমতকেশৱ যজ্ৱনঃ।
কান্তিমত্যাং প্রসূতায যতিরাজায মঙ্গলম্॥ ৭ ॥

পাদুকে যতিরাজস্য কথযন্তি যদাখ্যযা।
তস্য দাশরথেঃ পাদৌ শিরসা ধারযাম্যহম্॥ ৮ ॥

শ্ৰীমতে রম্যজামাতৃ মুনীন্দ্রায মহাত্মনে।
শ্ৰীরঙ্গৱাসিনে ভূযাত্ নিত্যশ্ৰীঃ নিত্যমঙ্গলম্॥ ৯ ॥

সৌম্যজমাতৃ যোগীন্দ্র চরণাম্বুজ ষটপদম্।
দেৱরাজগুরুং ৱন্দে দিৱ্যজ্ঞানপ্রদং শুভম্॥ ১০ ॥

ৱাধূল শ্ৰীনিৱাসাৰ্য তনযং ৱিনযাধিকম্।
প্রজ্ঞানিধিং প্রপদ্যেহং শ্ৰীনিৱাসমহাগুরুম্॥ ১১ ॥

চণ্ডমারুত ৱেদান্তৱিজযাদি স্বসূক্তিভিঃ।
ৱেদান্ত রক্ষকাযাস্তু মহাচার্যায মঙ্গলম্॥ ১২ ॥

॥ ইতি শ্রীনৃসিংহমঙ্গলম্ সমাপ্তম্ ॥